### (2) असंबाधा

Def. म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा।
Sch. G. म, त, न, स, ग, ग (5. 9).
Ex. वीर्याग्नौ येन ज्वलति रणवशात् क्षिप्ते
दैत्येन्द्रे जाता धरणिरियमसंबाधा।
धर्मस्थित्यर्थं प्रकटिततनुसंबन्धः
साधूनां बाधां प्रशमयतु स कंसारिः॥

### (3) पथ्या

(Also called मञ्जरी).

Def. सजसा यलौ च सह गेन पथ्या मता।
Sch. G. स, ज, स, य, ल, ग (5. 9).
Ex. स्थगयन्त्यमूः शमितचातकार्तस्वरा
जलदास्तडित्तुलितकान्तकार्तस्वराः।
जगतीरिह स्फुरितचारुचामीकराः
सवितुः क्वचित् कपिशयन्ति चामी कराः॥ Śi. 4. 24.

### (4) प्रमदा

(also called कुररीरुता).

Def. नजभजला गुरुश्च भवति प्रमदा।
Sch. G. न, ज, भ, ज, ल, ग (6. 8).
Ex. अनतिचिरोज्झितस्य जलदेन चिर-
स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम्।
विरलविकीर्णवज्रशकला सकला-
मिह विदधाति धौतकलधौतमही॥ Śi. 4. 41.

### (5) प्रहरणकलिका

Def. ननभनलगिति प्रहरणकलिका।
Sch. G. न, न, भ, न, ल, ग (7. 7).
Ex. व्यथयति कुसुमप्रहरण कलिका
प्रमदवनभवा तव धनुषि तता।
विरहविपदि मे शरणमिह ततो
मधुमथनगुणस्मरणमविरतम्॥

### (6) मध्यक्षामा

(Also called हंसश्येनी or कुटिल).

Def. मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ।
Sch. G. म, भ, न, य, ग, ग (4. 10).
Ex. नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रै-
रानीलाभैर्विरचितपरभागा रत्नैः।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी
मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया॥ Ki. 5. 31.

### (7) वसन्ततिलका

(Also called वसन्ततिलक, उद्धर्षिणी, सिंहोन्नता).

Def. उक्ता वसन्ततिलका तभजा जगौ गः।
Sch. G. त, भ, ज, ज, ग, ग (8. 6).
Ex. यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतारुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु॥ Ś. 4. 1.

### (8) वासन्ती

Def. मात्तो नो मो गौ यदि गदिता वासन्तीयम्।
Sch. G. म, त, न, म, ग, ग (4. 6. 4).
Ex. भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः
श्रीखण्डाद्रेरद्भुतपवनैर्मन्दान्दोला।
लीलालोला पल्लवविलसद्धस्तोल्लासैः
कंसारातौ नृत्यति सदृशी वासन्तीयम्॥

---

*Metres with 15 Syllables in a quarter*

## (अतिशक्वरी)

### (1) तूणक

Def. तूणकं समानिकापदद्वयं विनान्तिमम्।
Sch. G. र, ज, र, ज, र (4. 4. 4. 3, or 7. 8).
Ex. सा सुवर्णकेतकं विकाशि भृङ्गपूरितं
पञ्चबाणबाणजालपूर्णहेमतूणकम्।
राधिका वितर्क्य माधवाय मासि माधवे
मोहमेति निर्भरं त्वया विना कलानिधे॥

### (2) मालिनी

Def. ननमयययुतेयं मालिनी भोगिलोकैः।
Sch. G. न, न, म, य, य (8. 7).
Ex. शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः॥ R. 6. 85.

### (3) लीलाखेल

Def. एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः।
Sch. G. म, म, म, म, म.
Ex. मा कान्ते पक्षस्यान्ते पर्याकाशे देशे स्वाप्सीः
कान्तं वक्त्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
क्षुत्क्षामः प्राटंश्चेतश्चेतो राहुः क्रूरः प्राथात्
तस्माद् ध्वान्ते हर्म्यस्यान्ते शय्यैकान्ते कर्तव्या॥
Sar. K.

### (4) शशिकला

Def. गुरुनिधनमनुलघुरिह शशिकला।
Sch. G. न, न, न, न, स (all short syllables except the last).
Ex. मलयजतिलकसमुदितशशिकला
व्रजयुवतिलसदलिकगगनगता।
सरसिजनयनहृदयसलिलनिधिं
व्यतनुत विततरभसपरितरलम्॥

---